# Suvarnamuktavali Stuti

# સુવર્ણમુક્તાવલીસ્તુતિઃ

## Document Information

Text title : Suvarnamuktavali Stuti

File name : suvarNamuktAvalIstutiH.itx

Category : devii, devI, stuti, durgA

Location : doc_devii

Proofread by : Mohan Chettoor

Description/comments : From Stotras Samahara Part 1 (ed. K.Raghavan Pillai)

Latest update : September 4, 2022

Send corrections to : sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanskript**.

March 11, 2023

*sanskritdocuments.org*

# સુવર્ણમુક્તાવલીસ્તુતિઃ

અદ્વૈતમક્ષરમનન્તમભક્તલોકૈ-
    રજ્ઞેયતત્ત્વમનુમેયમતીન્દ્રિયજ્ઞૈઃ ।
અવ્યક્તમર્ચયદનુગ્રહણાત્તરૂપ-
    મન્તઃપુરં પુરરિપોરરુણં ભજામઃ ॥ ૧॥

આતામ્રમાત્તધનુરઙ્કુશપાશબાણ-
    માદર્શનિર્મલકપોલકમાયતાક્ષમ્ ।
આનન્દચિન્મયમહઃ સ્તુતમાગમાન્તૈ-
    રાર્યાખ્યમાર્તિહરમાશુ મમાન્તરાસ્તામ્ ॥ ૨॥

ઇન્દ્રાદિદિવ્યપદદામિયતીત્યમેયા-
    મિન્દીવરાક્ષિયુગલીમિતિહાસવેદ્યામ્ ।
ઇન્દુપ્રકાશવદનામિભરાજયાતા-
    મિષ્ટાર્થદાં ભગવતીમિહ ચિન્તયામિ ॥ ૩॥

ઈશિત્વમુખ્યફલદાં જગદીશ્વરીં તા-
    મીશાનવામનિલયામિયતીદૃશીતિ ।
ઈક્ષાવતામવિષયં મહદીહિતાઙ્ઘ્રિ-
    મીડે પરાં સુરગવીમહમીપ્સિતાનામ્ ॥ ૪॥

ઉન્નિદ્રપઙ્કજમુખીમુદિતારુણાભા-
    મુદ્વૃત્તપીવરકુચામુપગીયમાનામ્ ।
ઉચ્ચૈસ્તરામુપનિષદ્ભિરુપાસકાના-
    મુચ્ચાવચેષ્ટફલહેતુમુમામુપાસે ॥ ૫॥

ઊરીકૃતાત્મચરણાર્પિતચિત્તવૃત્તિ-
    મૂર્ધસ્થિતાં નિગમમૌલિભિરૂહ્યમાનામ્ ।
ઊનેતરાર્થફલદાં પરમેશ્વરોઢા-
    મૂઢત્રિલોકભરણાં જનનીં પ્રપદ્યે ॥ ૬॥

ઋગ્ભિર્યજુર્ભિરપિ સામભિરર્ચકાના-
    મૃદ્ધિપ્રદાનનિરતામૃતુહૂયમાનામ્ ।
ઋત્વિગ્ભિરધ્વરમયીમૃતસત્યનેત્રા-
    મૃજ્વીમૃભુક્ષમહિતામનુસન્દધામિ ॥ ૭॥

એકાન્તભક્તિસુલભામતિમાત્રરમ્યા-
    મેકાત પત્રફલદાં સકૃદર્ચકાનામ્ ।
એતાદૃશીત્યવિદિતાં નિગમાવલીભિ-
    રેકામનેકજનનીં વયમાશ્રયામઃ ॥ ૮॥

ઐક્યં ત્વયા સહ મહેશ્વરિ ! લબ્ધુકામા
    નૈકાધિપત્યમવનેરપિ કામયન્તે ।
ઐશ્વર્યસિદ્ધિમતુલામપિ યાચમાનો
    જિહ્રેમિ કેવલમહં સુખમૈહિકં ત્વામ્ ॥ ૯॥

ઓતં સમસ્તભુવનં યદમેયશક્તા-
    વોજસ્વિ ભાતિ કલયન્તિ તપાંસિ યસ્યામ્ ।
ઓકોઽપ્યયાતુમનસઃ સમુપાસ્મહે તા-
    મોઙ્કારદિવ્યકમલાકરરાજહંસીમ્ ॥ ૧૦॥

ઔદાર્યમાશ્રિતજનેષુ તવાતિમાતૃ
    ઔપમ્યહીનમિતિ સર્વજગત્યસિદ્ધમ્ । (સર્વજગત્પ્રસિદ્ધમ્)
ઔચિત્યમમ્બ ! કિમિદં યદુપેક્ષસે મા-
    મૌર્વાગ્નિદુર્વિષહદૈન્યવિદૂયમાનમ્ ॥ ૧૧॥

કલ્યાણમાવહતુ મે કમલાવિરિઞ્ચિ-
    કાન્તાકરાન્તધૃતચામરશોભિપાર્શ્વમ્ ।
કલ્યાણશૈલનિલયં કિમપિ સ્વરૂપં
    કોદણ્ડબાણસૃણિપાશકરારવિન્દમ્ ॥ ૧૨॥

ખેલન્તુ મે મનસિ ખેચરમૌલિમાલા-
    લોલન્મણીકિરણરઞ્જિતપાદુકાયાઃ ।
પાદાબ્જરેણુકણિકાઃ પરદેવતાયા
    વોઢું શિવઃ શિરસિ યા હિ ભિનત્તિ ગોત્રમ્ ॥ ૧૩॥

ગઙ્ગાધરપ્રણયિની ચરણારવિન્દે

શ્ૃઙ્ગારકન્દલિતકાન્તિઝરીમરન્દે ।
ભૃઙ્ગાયતાં મમ મનઃ પુરુષાર્થકન્દે
તુઙ્ગાનુભાવિનિ મિલન્મુનિહંસવૃન્દે ॥ ૧૪॥

ઘર્માન્તકાલજલમુક્પટલીધુરીણે
ઘોરામયાનિલદવાનલતાપભાજામ્ ।
ઘસ્રાગમે પ્રણતમોહતમસ્તતીના-
મઙ્ઘ્રિદ્વયે લગતુ મે હૃદયં શિવાયાઃ ॥ ૧૫॥

ઙ્યાવન્તવાચ્યમિતરચ્ચ સમસ્તમેતદ્
યસ્યા વિભાતિ કલયા સમનુપ્રવિષ્ટમ્ ।
તસ્યામનન્તસુખચિન્મયવિગ્રહાયાં
લીયે ગિરીશગુરુભાગ્યપરમ્પરાયામ્ ॥ ૧૬॥

ચન્દ્રાર્ધશેખરમિનેન્દુહુતાશનેત્રં
ચારુસ્મિતાસ્યમરુણં પરમાણુમધ્યમ્ ।
ચામીકરાભરણમુચ્ચકુચં મનોજ્ઞં
ચિત્તે ચકાસ્તુ તરુણં શિવકામિ તેજઃ ॥ ૧૭॥

છાયામહીરુહિ ભવોષરમાર્ગભાજાં (ભવોપરમાર્ગ?)
છાયાવિધૂતકુરુવિન્દ મણિપ્રભાયામ્ ।
છાયેવ સજ્જતુ મણૌ મમ ચેતનેયં
ત્રૈલોક્યમાતરિ મહેશ્વરવલ્લભાયામ્ ॥ ૧૮॥

જન્તોર્લલાટલિખિતાપિ લિપિર્વિધાત્રા
જન્માન્તરાચરિતપાતકસૂચયિત્રી ।
જાયેત દિવ્યસુખદા યદપાઙ્ગદૃષ્ટ્યા
જાયામુમાં પુરભિદો હૃદિ મન્મહે તામ્ ॥ ૧૯॥

ઝઞ્ઝામરુદ્ભિરિવ દુસ્સહમેઘમેલાઃ
શીર્યન્તિ સર્વવિપદઃ કરુણાકટાક્ષૈઃ ।
યસ્યાઃ સકૃત્ પ્રણતમાતૃપદામ્બુજાયા(?) -
સ્તાં સર્વલોકજનનીં શરણં પ્રપદ્યે ॥ ૨૦॥

ઞિધષ્ફડીષ્ષુ વિહિતાસુ કતપ્રકૃત્યા
યદ્રૂપમુલ્લસતિ તત્ ખલુ નામ યસ્યાઃ ।
જ્ઞાનપ્રદં સકલરોગહરં પવિત્રં

તાં ભાવયામિ મનસા હિમશૈલકન્યામ્ ॥ ૨૧॥

ટઙ્કાયતે વિપુલપાપમહોપલાનાં
યસ્યાઃ સકૃચ્ચરણયોર્વિહિતઃ પ્રણામઃ ।
તામાશ્રયે સુખકરીં જગતાં ત્રયાણાં
નિશ્શેષદુઃખશમનાથ સતીં ભવાનીમ્ ॥ ૨૨॥

ઠઙ્કારકલ્પમણિમધ્યવિરાજમાન-
તાટઙ્કરત્નયુગલાચિતપુષ્પવદ્ભ્યામ્ ।
દેદીપ્યમાન માણદર્પણતુલ્યગણ્ડાં
કામેશ્વરાઙ્કનિલયાં પ્રણમામિ ગૌરીમ્ ॥ ૨૩॥

ડોલાયમાનમનસાં બહુચિન્તયાલં
દારિદ્ર્યદુઃખભવયા ભવિનાં યદીયે ।
પાદામ્બુજન્મનિ રતિઃ સુરશાખિશાખા
સા પાર્વતી શરણમદ્ય મમાસ્તુ દેવી ॥ ૨૪॥

ઢક્કાધરસ્ય નટતો નટનાયકસ્ય
નૃત્તાનુકારચતુરાં ચતુરાસ્યનૂતામ્ ।
આપન્નભક્તજનરક્ષણજાગરૂકા-
મમ્બાં ભજે નતમનોરથકલ્પવલ્લીમ્ ॥ ૨૫॥

ણિઙ્પ્રત્યયોઽનુવદતિ પ્રકૃતેરિવાર્થં
સૃષ્ટિસ્થિતિક્ષયકૃતો મિલનેન યસ્યાઃ ।
સૃષ્ટિસ્થિતિક્ષયવિધીન્ વિદધાતિ શમ્ભુ-
સ્તસ્યૈ નમઃ પ્રકૃતયે ભુવનૈકગત્યૈ ॥ ૨૬॥

તન્વી તટિત્તનુલતા તરુણેન્દુવક્ત્રા
તારુણ્યયોગલલિતા તરલાયતાક્ષી ।
તામ્રાધરા તરલહારકુચાન્તરાલા
તાપાપહા ભગવતી ભવતાત્ પુરસ્તાત્ ॥ ૨૭॥

થુટ્ સસ્ય સન્નિવ પરસ્ય પરોપકારાદ્
યત્સેવકસ્ય નિટિલોપરિ ચન્દ્રખણ્ડઃ ।
આગચ્છતિ પ્રણતવાઞ્છિત કલ્પવલ્લી-
મારાધ્મહે મનસિ હૈમવતી કુમારીમ્ ॥ ૨૮॥

દીનાવનૈક નિરતાં ભુવનાધિપત્ય-
    દાનપ્રવીણચરણામ્બુરુહોપહારામ્ ।
દેવીં દયાર્દ્રનયનાં દધતીમુપાસે
    પાશેક્ષુચાપસુમબાણસૃણીન્ કરાબ્જૈઃ ॥ ૨૯॥

ધન્યાં યશસ્યમતિપાવનમામયઘ્નં (કુન્યં યશસ્ય)
    ધૈર્યાવહં સુખકરં ભવરોગહારિ ।
ધામપ્રદં ભયહરં ચરિતં યદીયં
    ધાત્રી ધરાધરસુતા મમ સા પ્રસીદેત્ ॥ ૩૦॥

નામાવલી નયતિ કીર્તયતો યદીયા
    નાકં નરાનધિકદુષ્કૃતકારિણોઽપિ ।
નારાયણસ્ય સહજાં સહજાર્દ્રભાવાં
    નાથામિ તાં શુભગતિં નગરાજપુત્રીમ્ ॥ ૩૧॥

પઞ્ચાસ્યમઞ્ચનિલયાં પરમાત્મરૂપાં
    પઞ્ચોપચારસરસાં પરિપૂર્ણકામામ્ ।
પઞ્ચાયુધાભયકરીં પરચિત્પ્રકાશાં
    પઞ્ચાપહારિચરિતાં ગિરિજામુપાસે ॥ ૩૨॥

ફુલ્લારવિન્દવદને ! ફલદે ! ક્રિયાણાં
    ફાલેક્ષણાર્જિતસુકર્મફલસ્વરૂપે ! ।
કલ્હારગન્ધચિકુરે ! કુરુવિન્દશોભે !
    કારુણ્યશાલિનિ ! વિલોકય મામપાઙ્ગૈઃ ॥ ૩૩॥

બાલામૃતાંશુકલિકાપરિશોભિફાલે !
    બાલારુણારુણશરીરમરીચિમાલે ! ।
ત્રૈલોક્યપાલિનિ ! વિલોકયિતું શિવે ! માં
    કાલોઽયમેવ કરુણાશિશિરૈઃ કટાક્ષૈઃ ॥ ૩૪॥

ભદ્રાણિ પશ્યતિ ભવત્યપિકો જગત્યાં (ભવત્યધિપો)
    ભગ્નો ન જાતુ ન બિભેતિ કુતશ્ચનાયમ્ ।
ભાગ્યેન યોઽત્ર ભજતે તવ પાદપદ્મં
    ભક્તિર્દૃઢા ભવતુ મે ત્વયિ ભક્તવશ્યે ! ॥ ૩૫॥

માતઙ્ગમઞ્જુલગતે ! મહનીયમૂર્તે !
    મન્દારવલ્લિ ! ભજતાં મનસાધિગમ્યે ! ।

માયે ! મહેશ્વરવિલાસિનિ ! મા તનિષ્ઠા !
　　માયામહાસરિતિ મજ્જતિ મય્યુપેક્ષામ્ ॥ ૩૬॥

યા વિશ્વમાત્મમહસા સમનુપ્રવિષ્ટા
　　યામેવ સર્વમનુયાતિ યયા વિભાતિ ।
યસ્યૈ કરોતિ સમુદેતિ યતશ્ચ રૂપં
　　યસ્યા લયં વ્રજતિ યત્રચસા ત્વમેવ ॥ ૩૭॥

રાજા વિભાસતિ ભવાનિ ! કટાક્ષતિ શ્રી (રાજાપિ દાસતિ)
　　રાજાનતિ શ્રિતજનોરધનાયિ વાણી । (રસનાતિ વાણી)
રામા રમાન્તિ ખલુ દેવતિ દેવિ ગેહં
　　ત્વત્સેવકસ્ય નહિ કિં મયિ વસ્તુ કિં વા ॥ ૩૮॥

લક્ષ્યીકુરુષ્વ લલિતે ! લલિતૈઃ કટાક્ષૈ-
　　લક્ષ્મીકરૈર્ઝટિતિ માં લઘયાતુ દૈન્યમ્ । (લઘયાશુ)
લોકપ્રસિદ્ધમહિમાવલિલાઘવં તે
　　મા ભૂદયં તવ જનો ભુવિ સીદતીતિ ॥ ૩૯॥

વાચસ્પતિર્ભવતિ મૃકતમોઽપિ પઙ્ગુ-
　　ર્વારાન્નિધીંસ્તરન્તિ દર્શયતેઽહ્નિ તારમ્ ।
અન્તેઽપિ નાકમઘવાનતિયાતિ દેહી
　　યત્પાત્રમમ્બ ! તવ તં દિશ મય્યપાઙ્ગમ્ ॥ ૪૦॥

શંસન્તિ શઙ્કરિ ! શશાઙ્કકલાવતં સે !
　　શાસ્ત્રાણિ સર્વજગતાં ભવતીં સવિત્રીમ્ ।
શઙ્કાં વિનાયમઘવાનતિભક્તવન્મા-
　　માલોકયામ્બ ! સમધીર્હિ સુતેષુ માતા ॥ ૪૧॥

ષડ્ગોઽપિ સાધુવિમુખોઽપિ ષડાસ્યમાતઃ !
　　ષડ્વૈરિવર્ગપરિભૂતષડિન્દ્રિયોઽપિ ।
ષટ્પઙ્કજોપરિગતે ! ભવતીં પ્રપન્નઃ
　　ષટ્કર્મગમ્યપદમાશ્રયતે જનુષ્માન્ ॥ ૪૨॥

સત્ત્વં રજસ્તમ ઇતિ પ્રકૃતેર્ગુણૈસ્તે
　　સર્ગસ્થિતિપ્રમવસંસ્થિતહેતુભૂતૈઃ । (સર્ગસ્થિતિપ્રલય)
સ્રષ્ટાવિભુપ્રભૃતયો ન વિદુઃ સ્વરૂપં
　　સત્યં તવામ્બ ! નુતયે ભુવિ કોઽલમન્યઃ ॥ ૪૩॥

હાલામદારુણિમહારિહનુપ્રદેશે !
    હાલાહલાશનસુખાવહદિવ્યમૂર્તે ! ।
હર્યશ્વમુખ્યહરિદીશનુતેઽમ્બ ! માસ્માન્
    હાસીસ્ત્વદેકશરણાનતિદીનભાવાન્ ॥ ૪૪॥

ક્ષિત્યાદિભૂતમયિ ! કિઞ્ચિદપિ ત્વદિચ્છાં
    ક્ષેત્રજ્ઞરૂપિણિ ! વિના ચલિતું ન શક્તમ્ ।
ક્ષન્તવ્યમેવ કૃતમમ્બ ! શુભાશુભં મે
    ક્ષ્માભૃત્સુતે ! પતિનિદેશકરા હિ ભૃત્યાઃ ॥ ૪૫॥

એતાં મયા વિરચિતાં વરદે ! “સુવર્ણ-
    મુક્તાવલી” તવ મુદે જગદેકમાતઃ ! ।
પ્રત્યર્પયામિ કૃપયા પરિગૃહ્ય કુર્યા
    વક્ષોજકુઙ્કુમરસૈઃ સરસાં સમગ્ર્યામ્ ॥ ૪૬॥

(સ્તુતિરિયં આદિક્ષાન્તવર્ણાવલ્યા સમારબ્ધત્વાચ્ચારુવર્ણ-
કલિતત્વાચ્ચ દ્વેધા સાર્થનામ્ની ।)
(This stotra is in praise of goddess Durga
and is similar to the kumArastavaH in that here
too the stanzas are arranged in alphabetical
order.)

ઇતિ સુવર્ણમુક્તાવલીસ્તુતિઃ સમાપ્તા ।

Proofread by Mohan Chettoor

*Suvarnamuktavali Stuti*

pdf was typeset on March 11, 2023

Please send corrections to *sanskrit@cheerful.com*